श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमद्भागवते तृतीयस्कन्धे

# ॥ श्री कर्दमस्तुतिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री कर्दमस्तुतिः ॥

ऋषिरुवाच

जुष्टं बताद्याखिलसत्त्वराशेः
सांसिद्ध्यमक्ष्णोस्तव दर्शनान्नः।
यद्दर्शनं जन्मभिरीड्य सद्भिः
आशासते योगिनो रूढयोगाः ॥ 1 ॥

ये मायया ते हतमेधसस्त्वत् -
पादारविन्दं भवसिन्धुपोतम्।
उपासते कामलवाय तेषां
रासीश कामान्निरयेऽपि ये स्युः ॥ 2 ॥

तथा स चाहं परिवोढुकामः
समानशीलां गृहमेधधेनुम्।
उपेयिवान्मूलमशेषमूलं
दुराशयः कामदुघाङ्घ्रिपस्य ॥ 3 ॥

प्रजापतेस्ते वचसाधीश तन्त्या
लोकः किलायं कामहतोऽनुबद्धः।
अहं च लोकानुगतो वहामि
बलिं च शुक्लानिमिषाय तुभ्यम् ॥ 4 ॥

लोकांश्च लोकानुगतान् पशूंश्च
हित्वा श्रितास्ते चरणातपत्रम्।

परस्परं त्वद्गुणवादसीधु -
    पीयूषनिर्यापितदेहधर्माः ॥ 5 ॥

न तेऽजराक्षभ्रमिरायुरेषां
    त्रयोदशारं त्रिशतं षष्टिपर्व।
षण्नेम्यनन्तच्छदि यत्त्रिणाभि
    करालस्रोतो जगदाच्छिद्य धावत् ॥ 6 ॥

एकः स्वयं सञ्जगतः सिसृक्षया -
    द्वितीययात्मन्नधियोगमायया।
सृजस्यदः पासि पुनर्ग्रसिष्यसे
    यथोर्णनाभिर्भगवन् स्वशक्तिभिः ॥ 7 ॥

नैतद्बताधीश पदं तवेप्सितं
    यन्मायया नस्तनुषे भूतसूक्ष्मम्।
अनुग्रहायास्त्वपि यर्ही मायया
    लसत्तुलस्या तनुवा विलक्षितः ॥ 8 ॥

तं त्वानुभूत्योपरतक्रियार्थं
    स्वमायया वर्तितलोकतन्त्रम्।
नमाम्यभीक्ष्णं नमनीयपाद -
    सरोजमल्पीयसि कामवर्षम् ॥ 9 ॥

॥ इति श्री कर्दमस्तुतिः समाप्ता ॥